# શ્રીવિષ્ણુસ્તુતિઃ (ગજેન્દ્રકૃતા)

shrIviShNustutiH (gajendrakRRitA)

sanskritdocuments.org

May 12, 2018

# shrIviShNustutiH (gajendrakRRitA)

# શ્રીવિષ્ણુસ્તુતિઃ (ગજેન્દ્રકૃતા)

## Sanskrit Document Information

Text title : viShNustutiHgajendra

File name : viShNustutiHgajendra.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 12, 2018

*sanskritdocuments.org*

# શ્રીવિષ્ણુસ્તુતિઃ (ગજેન્દ્રકૃતા)

Oન્નમો ભગવતે તસ્મૈ યત એતચ્ચિદાત્મકમ્ ।
પુરુષાયાદિબીજાય પરેશાયાભિધીમહિ ॥ ૧॥

યસ્મિન્નિદં યતશ્ચેદં યેનેદં ય ઇદં સ્વયમ્ ।
યોઽસ્માત્પરસ્માચ્ચ પરસ્તં પ્રપદ્યે સ્વયમ્ભુવમ્ ॥ ૨॥

યઃ સ્વયાત્મનીદં નિજમાયયાર્પિતં ક્વચિદ્વિભાતં ક્વ ચ તત્તિરોહિતમ્ ।
અવિદ્ધદૃક્ સાક્ષ્યુભયં તદીક્ષતે સ આત્મમૂલોઽવતુ માં પરાત્પરઃ ॥ ૩॥

કાલેન પઞ્ચત્વમિતેષુ કૃત્સ્નશો લોકેષુ પાલેષુ ચ સર્વહેતુષુ ।
તમસ્તદાસીદ્ગહનં ગભીરં યસ્તસ્ય પારેઽભિવિરાજતે વિભુઃ ॥ ૪॥

ન યસ્ય દેવા ઋષયઃ પદં વિદુર્જન્તુઃ પુનઃ કોઽર્હતિ ગન્તુમીરિતુમ્ ।
યથા નટસ્યાકૃતિભિર્વિચેષ્ટતો દુરત્યયાનુક્રમણઃ સ માઽવતુ ॥ ૫॥

દિદૃક્ષવો યસ્ય પદં સુમઙ્ગલં વિમુક્તસઙ્ગા મુનયઃ સુસાધવઃ ।
ચરન્ત્યલોકવ્રતમવ્રણં વને ભૂતાત્મભૂતાઃ સુહૃદઃ સ મે ગતિઃ ॥ ૬॥

ન વિદ્યતે યસ્ય ચ જન્મ કર્મ વા ન નામરૂપે ગુણદોષ એવ વા ।
તથાપિ લોકાપ્યયસમ્ભવાય યઃ સ્વમાયયા તાન્યનુકાલમૃચ્છતિ ॥ ૭॥

તસ્મૈ નમઃ પરેશાય બ્રહ્મણેઽનન્તશક્તયે ।
અરૂપાયોરુરૂપાય નમ આશ્ચર્યકર્મણે ॥ ૮॥

નમ આત્મપ્રદીપાય સાક્ષિણે પરમાત્મને ।
નમો ગિરાં વિદૂરાય મનસશ્ચેતસામપિ ॥ ૯॥

સત્ત્વેન પ્રતિલભ્યાય નૈષ્કર્મ્યેણ વિપશ્ચિતા ।
નમઃ કૈવલ્યનાથાય નિર્વાણસુખસંવિદે ॥ ૧૦॥

નમઃ શાન્તાય ઘોરાય મૂઢાય ગુણધર્મિણે ।
નિર્વિશેષાય સામ્યાય નમો જ્ઞાનઘનાય ચ ॥ ૧૧॥

ક્ષેત્રજ્ઞાય નમસ્તુભ્યં સર્વાધ્યક્ષાય સાક્ષિણે ।
પુરુષાયાત્મમૂલાય મૂલપ્રકૃતયે નભ -॥ ૧૨॥

સર્વેન્દ્રિયગુણદ્રષ્ટ્રે સર્વપ્રત્યયહેતવે ।
અસતા છાયયોક્તાય સદાભાસાય તે નગઃ ॥ ૧૩॥

નમો નમસ્તેઽખિલકારણાય નિષ્કારણાયાદ્ભુતકારણાય ।
સર્વાગમામ્નાયમહાર્ણવાય નમોઽપવર્ગાય પરાયણાય ॥ ૧૪॥

ગુણારણિચ્છન્નચિદૂષ્મપાય તત્ક્ષોભવિસ્ફૂર્જિતમાનસાય ।
નૈષ્કર્મ્યભાવેન વિવર્જિતાગમસ્વયમ્પ્રકાશાય નમસ્કરોમિ ॥ ૧૫॥

માદૃક્પ્રપન્નપશુપાશવિમોક્ષણાય
મુક્તાય ભૂરિકરુણાય નમોઽલયાય ।
સ્વાંશેન સર્વતનુભૃન્મનસિ પ્રતીત
પ્રત્યગ્દૃશે ભગવતે બૃહતે નમસ્તે ॥ ૧૬॥

આત્માઽઽત્મજાપ્તગૃહવિત્તજનેષુ સક્તૈઃ
દુષ્પ્રાપણાય ગુણસઙ્ગવિવર્જિતાય ।
મુક્તાત્મભિઃ સ્વહૃદયે પરિભાવિતાય
જ્ઞાનાત્મને ભગવતે નમ ઈશ્વરાય ॥ ૧૭॥

યં ધર્મકામાર્થવિમુક્તિકામા ભજન્ત ઇષ્ટાં ગતિમાપ્નુવન્તિ ।
કિં ત્વાશિષો રાત્યપિ દેહમવ્યયં કરોતુ મેઽદભ્રદયો વિમોક્ષણમ્ ॥ ૧૮॥

એકાન્તિનો યસ્ય ચ કઞ્ચનાર્થં વાઞ્છન્તિ યે વૈ ભગવત્પ્રપન્નાઃ ।
અત્યદ્ભુતં તચ્ચરિતં સુમઙ્ગલં ગાયન્તિ આનન્દસમુદ્રમગ્નાઃ ॥ ૧૯॥

તમક્ષરં બ્રહ્મ પરં પરેશમવ્યક્તમાધ્યાત્મિકયોગગમ્યમ્ ।
અતીન્દ્રિયં સૂક્ષ્મમિવાતિદૂરમનન્તમાદ્યં પરિપૂર્ણમીડે ॥ ૨૦॥

યસ્ય બ્રહ્માદયો દેવા વેદા લોકાશ્ચરાચરાઃ ।
નામરૂપવિભેદેન ફલ્ગ્વ્યા ચ કલયા કૃતાઃ ॥ ૨૧॥

યથાઽર્ચિષોઽગ્નેઃ સવિતુર્ગભસ્તયો
નિર્યાન્તિ સંયાન્ત્યસકૃત્ સ્વરોચિષઃ ।
તથા યતોઽયં ગુણસમ્પ્રવાહો
બુદ્ધિર્મનઃ ખાનિ શરીરસર્ગાઃ ॥ ૨૨॥

સ વૈ ન દેવાસુરમર્ત્યતિર્યઙ્
ન સ્ત્રી ન ષણ્ડો ન પુમાન્ન જન્તુઃ ।
નાયં ગુણઃ કર્મ ન સન્ન ચાસન્-
નિષેધશેષો જયતાદશેષઃ ॥ ૨૩॥

જિજીવિષે નાહમિહામુયા કિમન્તર્બહિશ્ચાવૃતયેભયોન્યા ।
ઇચ્છામિ કાલેન ન યસ્ય વિપ્લવસ્તસ્યાત્મલોકાવરણસ્ય મોક્ષમ્ ॥ ૨૪॥

સોઽહં વિશ્વસૃજં વિશ્વમવિશ્વં વિશ્વવેદસમ્ ।
વિશ્વાત્માનમજં બ્રહ્મ પ્રણતોઽસ્મિ પરં પદમ્ ॥ ૨૫॥

યોગરન્ધિતકર્માણો હૃદિ યોગવિભાવિતે ।
યોગિનો યં પ્રપશ્યન્તિ યોગેશં તં નતોઽસ્મ્યહમ્ ॥ ૨૬॥

નમો નમસ્તુભ્યમસહ્યવેગશક્તિત્રયાયાખિલધીગુણાય ।
પ્રપન્નપાલાય દુરન્તશક્તયે કદિન્દ્રિયાણામનવાપ્યવર્ત્મને ॥ ૨૭॥

નાયં વેદ સ્વમાત્માનં યચ્છક્ત્યાહન્ધિયા હતમ્ ।
તં દુરત્યયમાહાત્મ્યં ભગવન્તમિતોઽસ્મ્યહમ્ ॥ ૨૮॥

ઇતિ શ્રીમદ્ભાગવતાન્તર્ગતા ગજેન્દ્રકૃતા શ્રીવિષ્ણુસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIviShNustutiH (gajendrakRRitA)*
pdf was typeset on May 12, 2018

Please send corrections to *sanskrit@cheerful.com*